# योगवासिष्ठः/प्रकरणम् ६ (निर्वाणप्रकरणस्य पूर्वार्धम्)/सर्गः ०१४



अज्ञातलेखकः

### निर्वाणप्रकरणस्य पूर्वार्धम्


सर्गः १

सर्गः २

सर्गः ३

सर्गः ४

सर्गः ५

सर्गः ६

सर्गः ७

सर्गः ८

सर्गः ९

सर्गः १०

सर्गः ११

सर्गः १२

सर्गः १३

सर्गः १४

सर्गः १५

सर्गः १६

सर्गः १७

सर्गः १८

सर्गः १९

सर्गः २०

सर्गः २१

सर्गः २२

सर्गः २३

सर्गः २४

सर्गः २५

सर्गः ६५

सर्गः ६६

सर्गः ६७

सर्गः ६८

सर्गः ६९

सर्गः ७०

सर्गः ७१

सर्गः ७२

सर्गः ७३

सर्गः ७४

सर्गः ७५

सर्गः ७६

सर्गः ७७

सर्गः ७८

सर्गः ७९

सर्गः ८०

सर्गः ८१

सर्गः ८२

सर्गः ८३

सर्गः ८४

सर्गः ८५

सर्गः ८६

सर्गः ८७

सर्गः ८८

सर्गः ८९

सर्गः २६
सर्गः २७
सर्गः २८
सर्गः २९
सर्गः ३०
सर्गः ३१
सर्गः ३२
सर्गः ३३
सर्गः ३४
सर्गः ३५
सर्गः ३६
सर्गः ३७
सर्गः ३८
सर्गः ३९
सर्गः ४०
सर्गः ४१
सर्गः ४२
सर्गः ४३
सर्गः ४४
सर्गः ४५
सर्गः ४६
सर्गः ४७
सर्गः ४८
सर्गः ४९
सर्गः ५०
सर्गः ५१
सर्गः ९०
सर्गः ९१
सर्गः ९२
सर्गः ९३
सर्गः ९४
सर्गः ९५
सर्गः ९६
सर्गः ९७
सर्गः ९८
सर्गः ९९
सर्गः १००
सर्गः १०१
सर्गः १०२
सर्गः १०३
सर्गः १०४
सर्गः १०५
सर्गः १०६
सर्गः १०७
सर्गः १०८
सर्गः १०९
सर्गः ११०
सर्गः १११
सर्गः ११२
सर्गः ११३
सर्गः ११४
सर्गः ११५

सर्गः ५२ सर्गः ११६
सर्गः ५३ सर्गः ११७
सर्गः ५४ सर्गः ११८
सर्गः ५५ सर्गः ११९
सर्गः ५६ सर्गः १२०
सर्गः ५७ सर्गः १२१
सर्गः ५८ सर्गः १२२
सर्गः ५९ सर्गः १२३
सर्गः ६० सर्गः १२४
सर्गः ६१ सर्गः १२५
सर्गः ६२ सर्गः १२६
सर्गः ६३ सर्गः १२७
सर्गः ६४ सर्गः १२८

## चतुर्दशः सर्गः १४

श्रीवसिष्ठ उवाच ।

अस्ति तावदनन्तस्य तस्य क्वचिदयं किल ।

जगद्रूपः परिस्पन्दो मृगतृष्णा मराविव ।। १

तत्र कारणतां यातो ब्रह्मा कमलसंभवः ।

स्थितः पितामहत्वेन सृष्टभूतभरभ्रमः ।। २

तस्याहं मानसः पुत्रो वसिष्ठः श्रेष्ठचेष्टितः ।

ऋक्षचक्रे ध्रुवधृते निवसामि युगं प्रति ।। ३

सोऽहं कदाचिदास्थाने स्वर्गे तिष्ठञ्छतक्रतोः ।

श्रुतवान्नारदादिभ्यः कथां सुचिरजीविनाम् ।। ४

कथाप्रसङ्गे कस्मिंश्चिदथ तत्राभ्युवाच ह ।

शातातपो नाम मुनिर्मौनी मानी महामतिः ।। ५
मेरोरीशानकोणस्थे पद्मरागमये दिवि ।
अस्ति कल्पतरुः श्रीमाञ्छृङ्गे चूत इति श्रुतः ।। ६
तस्य कल्पतरोर्मूर्ध्नि दक्षिणस्कन्धकोटरे ।
कलधौतलताप्रोते विद्यते विहगालयः ।। ७
तस्मिन्निवसति श्रीमान्भुशुण्डो नाम वायसः ।
वीतरागो बृहत्कोशे ब्रह्मेव निजपङ्कजे ।। ८
स यथा जगतां कोशे जीवतीह सुराश्चिरम् ।
चिरंजीवी तथा स्वर्गे न भूतो न भविष्यति ।। ९
स दीर्घायुः स नीरागः स श्रीमान्स महामतिः ।
स विश्रान्तमतिः शान्तः स कान्तः कालकोविदः ।। १०
स यथा जीवति खगस्तथेह यदि जीव्यते ।
तद्भवेज्जीवितं पुण्यं दीर्घं चोदयमेव च ।। ११
इति तेन भुशुण्डोऽसौ भूयः पृष्टेन वर्णितः ।
यथावदेव देवानां सभायां सत्यमुक्तवान् ।। १२
कथावसरसंशान्तावथ याते सुरव्रजे ।
भुशुण्डं विहगं द्रष्टुमहं यातः कुतूहलात् ।। १३
भुशुण्डः संस्थितो यत्र मेरोः श्रृङ्गं तदुत्तमम् ।
संप्राप्तवान्क्षणेनाहं पद्मरागमयं बृहत् ।। १४
रत्नगैरिककान्तेन तेजसा वह्निवर्चसा ।
मध्वासवरसेनेव रञ्जयत्ककुभां गणम् ।। १५
कल्पान्तज्वलनोज्ज्वालापिण्डाद्रिमिव संचितम् ।
इन्द्रनीलशिखाधूममालोकारुणिताम्बरम् ।। १६
सर्वेषामेव रागाणां राशिमद्राविव स्थितम् ।
सर्वसंध्याभ्रजालानां घनमेकमिवाकरम् ।। १७
उत्क्रान्तिं कुर्वतो मेरोर्ब्रह्मनाड्येव निर्गतम् ।

मूर्धानमागतं कान्तं वाडवं जठरानलम् ।। १८

सुमेरुवनदेव्येव नवालक्तकरञ्जितम् ।

लीलयाऽऽदातुमिन्दुं खे नीतं हस्तशिखाङ्गुलिम् ।।१९

ज्वालाभिरिव मालाभिररुणाभिः पयोमुखम् ।

खं गन्तुमिव सस्पन्दं शैलस्थमिव वाडवम् ।। २०

ताराः स्प्रष्टुमिवाकाशमङ्गुलीभिरिव त्रिभिः ।

कचदंशुनखाग्राभिः परिचुम्बदिवोन्नतम् ।। २१

गर्जज्जीमूतमुरजं भूभृतानां तु मण्डपम् ।

हसत्कुसुमगुच्छाढ्यं ध्वनत्षट्पदपेटकम् ।। २२

दन्ततालदलावल्या परिहासादिव स्फुरत् ।

दोलालोलाप्सरोवृन्दमुदारमदमन्मथम् ।। २३

शिलाविश्रान्तविबुधमिथुनाश्रितकन्दरम् ।

वराम्बराजिनं शुभ्रगङ्गायज्ञोपवीति च ।। २४

तापसं पिङ्गलमिव वेणुदण्डधरं स्थितम् ।

गङ्गानिर्झरनिर्ह्रादि लतागृहगतामरम् ।। २५

गन्धर्वगीतसुभगमामोदमधुरानिलम् ।

फुल्लहेमाम्बुजोत्तंसं तारारत्नविभूषितम् ।

व्योम्नः पारमिव प्राप्तं पिङ्गलं मैरवं शिरः ।। २६

सितहरितपीतपाटल-

धवलैर्वनकुसुमराशिनवरङ्गैः ।

दिवि विहितामलचित्रं

लीलाचलममरयुवतिवर्गस्य ।। २७

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मी०दे०मोक्षो० निर्वाणप्र० पू० भुशुण्डोपाख्याने मेरुशिखरवर्णनं नाम चतुर्दशः सर्गः ।।१४।।